संस्कृतभारती samskrita bharati usa




# Samskritam As a Foreign Language (SAFL)

## NEWSLETTER

## APRIL 15, 2022

IN THIS ISSUE


- My SAFL Journey
- Important Dates
- सुभाषितम्
- Articles


# मम SAFL अनुभवः

SAFL द्वारा संस्कृतपठनेन मया उत्तमाः अनुभवाः प्राप्ताः | छात्राः सर्वे एकस्मिन् स्थले उत्साहेन, आनन्देन च अस्माकं संस्कृतिम् अपि च संस्कृतभाषां पठितुं शक्नुवन्ति | तस्मात् मैत्रीभावः अपि वर्धते | आबाल्यकालात् बालकेन्द्रे संस्कृतं पठितवान् | यदा अहं सप्तमे वर्गे आसं तदा PreSAFL वर्गं गत्वा एप्रल्मासे 'SAMS 200 Direct Entry' परीक्षां लिखितवान् | परीक्षायाम् उत्तीर्णतां प्राप्य तस्मिन् वर्षे एव ग्रीष्मकाले मम बालकेन्द्रस्य मित्रैः सह श्रद्धाशिबिरं गतवान् | Pennsylvania राज्ये Saylorsburg नगरे आर्षविद्या-गुरुकुले श्रद्धा- शिबिरम् आसीत् | अग्रिमे वर्षे SAMS300 समाप्य भारतेदेशे कर्णाटकराज्ये बेङ्गलूरु-नगरे विद्यमाने संस्कृतभारत्याः अक्षरभवने मेधा-आवासीय-शिबिरार्थं सप्ताहद्वयं यावत् उषितवान् | मेधाशिबिरे मम अविस्मरणीयः अनुभवः आसीत् |

इदानीम् अपि अहं सम्यक् स्मरामि यत् प्रतिसप्ताहं SAFL वर्गे बहु उत्साहेन वयं संस्कृतभाषया कथाः पठितवन्तः गीतानि गीतवन्तः अपि च रूपकाणि प्रदर्शितवन्तः | मित्रैः सह संस्कृतभाषया सम्भाषणं कृत्वा उत्तमरीत्या त्रीणि वर्षाणि अतीतानि | मम SAFL शिक्षिकाः बहु सरलतया, सुलभतया आनन्देन च पाठितवत्यः | अधुना अहं विश्वविद्यालये अपि संस्कृतं पठामि | कदाचित् SAFL अनुभवः मम स्मृतिपथे आगच्छति | विश्वविद्यालये मम संस्कृत-प्राध्यापिकया सह अहं SAFL / संस्कृतभारत्याः विषये अपि चर्चां करोमि ।

मेधा-शिबिरात् प्रोत्साहनं प्राप्य इतोपि संस्कृतेन सम्भाषणम् अपि च संस्कृतभारत्याः कार्येषु सहभागः करणीयः इति मया निश्चितम् | अतः शिबिरस्य समाप्तेः अनन्तरं भारतात् प्रत्यागत्य , न्यूजर्सी बालकेन्द्रे उपशिक्षकरूपेण संस्कृतं पाठयितुम् आरब्धवान् | तत्र १०१८ तम-वर्षतः २०२१ तम-वर्षपर्यन्तं संस्कृतसेवां कर्तुम् अवसरं प्राप्तवान् | गतग्रीष्मकाले प्रज्ञाश्रद्धाशिबिरयोः साहाय्यं कृतवान् | अस्मिन् (२०२१ - २०२२) शैक्षणिकवर्षे SAFL १०० स्तरे उपशिक्षकरूपेण पाठयन् महान्तं सन्तोषम् अनुभवामि |

प्रतिसप्ताहान्तं संस्कृतपाठनकार्येण आनन्दितः अस्मि | वर्गे छात्रैः सह चर्चाः, क्रीडाः च महां बहु रोचन्ते | यदा छात्राः नूतनैः पदैः स्ववाक्यानि संस्कृतेन रचयन्ति, तदा तानि वाक्यानि श्रुत्वा अहम् आश्चर्यचकितः भवामि | १००- स्तरीय-शिक्षकाणां साप्ताहिक-मेलने अपि भागं वहामि | अत्र सर्वे संस्कृतेन एव सम्भाषणं कुर्मः | या कापि भाषा भवतु , सम्भाषणेन एव तस्याः भाषायाः संरक्षणं कर्तुं शक्नुमः | इदानीम् अहं संस्कृतभारत्याः पाठनशैलीम् पाठ्यांशान् च सम्यक् अवगच्छामि | आगामि वर्षेऽपि SAFL वर्गं पाठयिष्यामि, संस्कृत-स्वाध्यायने निरतः भविष्यामि च |

गच्छता कालेन संस्कृतभारत्याः कार्यकर्ता भूत्वा एतस्याः संस्थायाः उद्देशम् अपि च संस्कृत-प्रचार-संरक्षण-कार्येषु भागं वोढुम् इच्छामि | मम सौभागयमस्ति यत् अहम् एतया संस्थया सह संस्कृतरक्षणाय कार्यं कर्तुं शक्नोमि इति | अन्यदपि वक्तुमिच्छामि यत् यथा मम विश्वविद्यालये संस्कृतं पाठ्यते तथा समग्र-अमेरिकादेशे विद्यमानेषु सर्वेषु विश्वविद्यालयेषु अपि संस्कृतपाठनं भवतु इति मम आशा |

जयतु संस्कृतम्!


Sharv Dave
SAFL Class of 2018
SAFL Teacher
Pursuing A.B. Neuroscience,
Princeton University

## IMPORTANT DATES

**Combined Registration for SAFL2022-23 Classes and Online Summer Camps**

**April 20, 2022** - Registration begins at 5 PM ET

**May 1, 2022**- Early Bird Discount Ends

**May 19, 2022** - Registration deadline (May close earlier without notice if classes are full)

**Online Summer Camps 2022**

**Sunday, June 19 – Saturday, June 25, 2022**: Prajnaa Online Summer Camp (SAMS099, SAMS103, SAMS203)

**Sunday, July 10 – Saturday, July 16, 2022:** Shraddhaa Online Summer Camp (SAMS099, SAMS103, SAMS203)

**Orientation Class**

**Aug 27/28/29/30/31, 2022** – Mandatory online orientation for all classes (SAMS100/200/300) during respective class times.

**First Semester - Fall 2022**

**Sept 3 – 7, 2022** – Labor Day Break. No classes (All courses)

**Sept 10 – 14, 2022** – First day of class (All courses)

**Oct 15 – 19, 2022** – Unit Exams – I (100 Level – All Sections)

**Oct 22 – 26, 2022** – Midterm Exams (200 and 300 Levels – All Sections)

**Nov 26 - 30, 2022** – Thanksgiving Break (All courses)

**Dec 3 – 7, 2022** – Unit Exams – II (100 Level – All Sections)

**Dec 23 – Jan 6, 2023** – Winter Break (All courses)

**Jan 14 - 18, 2023** – Final Exams (All courses)

**Inter semester break**

**Jan 21 - 25, 2023** – Inter semester break. No classes (All courses)

**Second Semester - Spring 2022**

**Jan 28 - Feb 1, 2023** – First day of class

**Mar 4 - 8, 2023** – Unit Exams – I (100 Level – All Sections)

**Mar 18 - 22, 2023** – Midterm Exams (200 and 300 Levels – All Sections)

**Apr 15 - 19, 2023** – Unit Exams II- (100 Level – All Sections)

**May 20 - 24, 2023**– Final Exams (All courses)

### REGISTRATION FOR 2022-23

**Registrations for SAFL 2022-23 Academic Year begin April 20, 2022 at 5 PM ET. Register at safl.sbusa.org**

## सुभाषितम्

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।।

यथा जलस्य बिन्दूनां क्रमशः स्रवणेन घटः पूर्णः भवति, तथैव सर्वाः विद्याः अपि निरन्तरं पठनेन अध्ययनेन वा अधिगताः भवन्ति । अपि च मनुष्यः धनम् अपि तथैव किञ्चित् किञ्चित् एकत्रीकृत्य एव धनवान् भवति ।

A pitcher is gradually filled when water falls in it drop by drop. Likewise, one promotes knowledge, virtue and wealth gradually.

Courtesy: Samskrittutorial.in & mysanskritsubhashit.wordpress.com

## कर्णाटक-सङ्गीत-पितामहः

पुरन्दरदासस्य पूर्वतनं नाम श्रीनिवासनायकः। सः मूल्याभरणानां विक्रयणं कृत्वा भूरि धनं सम्पादितवान् । जनाः तं "नवकोटिनारायणः" इति सम्बोधयन्ति स्म । परन्तु सः अतीव कृपणः आसीत् । एकदा कश्चन दरिद्रः ब्राह्मणः धनं याचितुं तस्य आपणम् आगतवान् । ब्राह्मणः उक्तवान्, "मम पुत्रस्य उपनयनं कारयितुम् इच्छामि, परन्तु धनं नास्ति । भवान् मह्यं कृपया किञ्चित् धनं ददातु" इति । श्रीनिवासनायकः अवदत्, "भवते धनं आवश्यकं चेत्, मह्यं किमपि आभरणं ददातु, धनं दास्यामि" इति । ब्राह्मणस्य समीपे आभरणं किमपि नासीत् । परन्तु सः त्यक्तुं न इष्टवान् । अन्यस्मिन् समये सः श्रीनिवासनायकस्य गृहं गतवान् । गृहे तस्य पत्नी आसीत् । सः तां पृष्टवान् "पुत्रस्य उपनयनम् अस्ति कृपया धनसाहाय्यं करोतु" इति । श्रीनिवासनायकस्य पत्नी करुणामयी दयालुः च । सा तस्य साहाय्यं कर्तुम् इष्टवती परन्तु तस्याः समीमे धनं नासीत् । तस्याः कृपणः आर्यपुत्रः एव सर्वं धनम् आरक्षति स्म । अतः सा किञ्चित् विचिन्त्य तस्याः स्वर्ण-नासिकाभरणं ब्राह्मणाय दत्तवती ।

ब्राह्मणः सन्तोषेण आभरणं स्वीकृत्य तस्य मूल्यसमं धनं प्राप्तुं पुनः श्रीनिवासनायकस्य आपणं प्रत्यागतवान् । "एतत् नासिका-भूषणं स्वीकृत्य मह्यं धनं ददातु" इति प्रार्थितवान् । नासिकाभरणं दृष्ट्वा एव श्रीनिवासनायकः तत् पत्न्याः इति अवगतवान् । आभरणं पेटिकायां स्थापयित्वा "अत्रैव तिष्ठतु आगच्छामि" इति उक्त्वा सः गृहं गतवान् । तस्य पत्न्याः नासिकायां भूषणं नास्ति इति दृष्टवान् । "कुत्र अस्ति भवत्याः नासिकाभरणम्?" इति गर्जितवान् । तस्य पत्नी दुःखिता भीता च आसीत् । अन्यथा शरणं नास्ति, आर्यपुत्रः तां निश्चयेन दण्डयति इति चिन्तयित्वा सा देवं प्रार्थितवती । अहो आश्चर्यं! तत्क्षणे एव नासिका-भूषणं तस्याः हस्तयोः अकस्मात् प्रत्यक्षं जातं! सा आर्यपुत्रम् उपगम्य नासिका-भूषणं दर्शितवती ।

श्रीनिवासनायकः आश्चर्यचकितः आसीत्, किमपि न अवगतवान् । पुनः सः आपणं प्रति धावितवान्, परन्तु पेटिकायां स्थापितं नासिकाभरणं तु तत्रैव आसीत्!! "भगवान् मह्यं शिक्षणं दातुमेव एवं परीक्षितवान्" इति सः आगतवान् । तत्क्षणमेव सः स्वस्य गृहं, धनं, सम्पत् सर्वं त्यक्त्वा, हरिदासः अभवत् ।भगवतः नारायणस्य नाम्नि अनेकानि सुन्दराणि गीतानि लिखितवान् । उञ्छवृत्तिं स्वीकृत्य गृहं गृहं गत्वा गीतानि गीत्वा सः समयं यापितवान् । अनन्तरं तस्य नाम पुरन्दरदासः इति अभवत् ।

पुरन्दरदासः चतुर्लक्षाधिकानि गीतानि रचितवान् । अनेके दक्षिणभारतीयाः तस्य गीतानि गायन्ति शृण्वन्ति च । कर्णाटकसङ्गीतक्षेत्रे तस्य गीतानि बहु प्रसिद्धानि । सः कर्णाटक-सङ्गीत-पितामहः इति प्रसिद्धः जातः ।

**Surabhi Karighattam**
**SAMS 302F**

## औद्धत्यम् अतिविश्रम्भं च उत्तमं नास्ति

कश्चन बालकः आसीत्। सः बुद्धिमान् किन्तु अलसः आसीत्। "अहम् बुद्धिमान् अस्मि, सर्वेषां छात्राणाम् अपेक्षया अहम् एव उत्तमः अस्मि" इति सः सर्वदा चिन्तयति स्म। यदा सः स्नेहितैः सह भवति तदापि बहु गर्वेण व्यवहरति स्म।

एकदा सः बालकः विद्यालये तस्य गणितकक्ष्यां गतवान्। विद्यालये गणितम् एव तस्य प्रियतमः विषय: आसीत्। यदा अध्यापिका प्रश्नं पृच्छति, एषः एव सर्वदा उत्तरं वदति स्म। सर्वा: परीक्षा: अपि सः सम्यक् लिखति स्म। वर्गे अध्यापिका उक्तवती यत् "एतस्मिन् अवसरे परीक्षा बह्वी कठिना भविष्यति, भवन्तः एतस्याः परिक्षायाः  कृते सम्यक् पूर्वसिद्धतां कुर्वन्तु, साहाय्यम् आवश्यकं चेत् मां पृच्छन्तु" इति ।

अनन्तरं सर्वे छात्राः परीक्षार्थं कथं पठामः इति चिन्तितवन्तः। तस्य बालकस्य स्नेहिताः अपि "परीक्षा कठिना भविष्यति इति अध्यापिका सूचितवती । अतः अस्माभिः सम्यक् पठनीयम्" इति चिन्तयित्वा  सामूहिक-पठनार्थं मेलनस्य योजनां कृतवन्तः आसन्। किन्तु सः बालकः "मम कृते परीक्षा सरला एव भविष्यति । किमपि पठितुम् अवश्यकता नास्ति" इति  अतिगर्वितः आसीत्। यदा तस्य स्नेहिताः तं पठनार्थम् आहूतवन्तः, अतिविश्वासेन सः तेषाम् आमन्त्रणं निराकृतवान् । "एषा परीक्षा बहु सरला भविष्यति। अपि च अहं बहु बुद्धिमान् अस्मि, अतः पठनस्य आवश्यकता नास्ति" इति सः न पठितवानेव। तस्य स्नेहिताः परीक्षार्थं बहुकालं पठितवन्तः। सः तान् उपहसितवान् अपि । "भवन्तः किमर्थं पठनाय समयं व्ययीकुर्वन्ति, बुद्धिः अस्ति चेत् पर्याप्तम्" इति उक्तवान्। एवमेव सः पठनेन विना वृथा समयं यापितवान् ।

परीक्षासमयः आगतः आसीत्। तं बालकं विहाय,सर्वे छात्राः बहु अधीराः भीताः च आसन्। यदा सः बालकः परीक्षां लेखितुम् आरब्धवान्, प्रथमं प्रश्नं दृष्ट्वा सः अपि अधीरः अभवत्  यतोहि सः उत्तरं न ज्ञातवान्। परन्तु तस्य स्नेहिताः परीक्षां शीघ्रं लिखन्तः आसन्, यतः ते पूर्वमेव समयं स्वीकृत्य परीक्षार्थं सम्यक् पठितवन्तः।

बालकः केवलं बुद्धिः एव अस्ति चेत् अपर्याप्तं, कार्यसाधनाय उद्यम: अपि आवश्यकः इति अभिज्ञाय स्वस्य अपराधम् अवगतवान् । तस्मात् दिनात् आरभ्य सः  बालकः प्रतिसमयं परीक्षार्थं सम्यक् पठितवान् अपिच सर्वदा विनयेन व्यवहृतवान् । औद्धत्यम् अतिविश्रम्भं च उत्तमं नास्ति इति सः बालकः अवगतवान् ।

**Samyutha Talagadadeevi**
**302G**

## मम सेवाकार्यस्य अनुभवः

Thanksgiving विरामकाले मम जननी जनकः च माम् उक्तवन्तौ यत् "वयं भारतदेशे एकस्य ग्रामस्य विद्यालये सेवाकार्यं कुर्मः" इति । RISE School नाम एषः विद्यालयः तमिल्नाडुराज्ये Coimbatore जिल्लायां Pollachi नगरे अस्ति । RISE विद्यालये मम सेवाकार्यस्य अनुभवः अत्युत्तमः आसीत् । तस्य विवरणम् अहम् अत्र सूचयामि ।

अहं मम कुटुम्बेन सह चेन्नै नगरं २०२२ तमे वर्षे January मासे गतवान् परन्तु तमिलनाडुराज्ये तस्मिन् समये Corona कारणेन सर्वत्र lockdown आसीत् । तस्मात् कारणात् February मासात् आरभ्य विद्यालयस्य उद्घाटनं भवति वा इति प्रतीक्षां कृतवन्तः । भगवत्कृपया सर्वत्र विद्यालयानाम् उद्घाटनं February प्रथमदिने कृतवन्तः । अहं मम कुटुम्बेन सह चेन्नै नगरतः Pollachi नगरं प्रति कार्यानेन गतवान् । RISE विद्यालयस्य छात्रैः सह मिलामि इति चिन्तनेन मम महान् सन्तोषः जातः ।

अनन्तरं वयं विद्यालयं प्राप्तवन्तः । विद्यालयः बहु विशालः आसीत् । द्रष्टुं बहु सुन्दरः रमणीयः च आसीत् । सर्वत्र छायादायकाः वृक्षाः आसन् । विद्यालयस्य प्राङ्गणे अनेके नारिकेलवृक्षाः धेनवः मयूराः च आसन् । अहं मम कुटुम्बेन सह विद्यालयस्य अतिथिगृहे उषितवान् । प्रतिदिनम् अहं विद्यालयं गत्वा छात्राणां साहाय्यं कृतवान् । सङ्गणकस्य विषये तत्रत्य छात्रान् पाठितवान् । सङ्गणकस्य विषये ज्ञातुं बालकाः सर्वे बहु उत्सुकाः आसन् । कर्णाटकसङ्गीतं अपि अहं पाठितवान् । सर्वे बहु इष्टवन्तः । छात्राः माम् बहून् प्रश्नान् पृष्टवन्तः । सायङ्काले बालकैः सह अहं क्रिकेट्-क्रीडां अपि करोमि स्म । अनन्तरम् अहं धेनूनां क्षीरं दुग्ध्वा स्वच्छं रुचिकरं च दुग्धं पीतवान् । धेनोः दुग्धदोहनं मम अविस्मरणीयः अनुभवः आसीत् यतोहि पूर्वं एवं कदापि न कृतवान् आसम् ।

ग्रामस्य छात्रान् मिलित्वा तेषां जीवनशैलीं च दृष्ट्वा अहम् अमेरिकदेशे अस्माकं जीवनस्य मूल्यत्वं ज्ञातवान् । एवं भारते मम सेवाकार्यम् अनुभवपूरकं सार्थकं च आसीत् ।

**Vanil Narayanan**
**202L**

## भारतदेशस्य स्वातन्त्र्यदिनोत्सवः

भारतदेशस्य स्वातन्त्र्यदिनोत्सवम् आगस्त्-मासस्य पञ्चदशे दिनाङ्के भारते सर्वत्र आचरन्ति । १९४७तमे वर्षे भारतीयाः ब्रिटिष्-शासनात् स्वतन्त्रतां प्राप्तवन्तः । भगतसिंहः सर्दार्-वल्लभाई-पटेल् गान्धीवर्यः - एवम् अनेके देशभक्ताः स्वतन्त्रतां प्राप्तुं बहु त्यागं कृतवन्तः । गान्धीवर्यः ब्रिटिष्-शासकैः विहितस्य लवणस्य करस्य विरोधे सत्याग्रहं चालितवान् । एतदर्थं कृतां यात्रां दण्डीयात्रा इत्यपि कथ्यते । १८५७ आरभ्य १९४७ पर्यन्तं स्वतन्त्रतार्थम् आन्दोलनम् अभवत् । अन्ते १९४७-तमे वर्षे भारतीयाः स्वतन्त्रतां प्राप्तवन्तः ।

भारतदेशस्य स्वातन्त्र्यदिनोत्सवं जनाः बहु सम्यक् आचरन्ति । जनाः भक्त्या राष्ट्रियगीतं गायन्ति । देशस्य प्रधानमन्त्री ध्वजारोहणं कृत्वा शुभाशयान् निवेदयति । बालाः, युवानः च अनेकासु क्रीडासु भागं वहन्ति । देशे सर्वत्र देशभक्तिविषये अनेकाः स्पर्धाः भवन्ति । शालासु नृत्यनाटकानि, प्रदर्शिन्यः च भवन्ति ।

एवं, भारतदेशस्य स्वतन्त्रदिनोत्सवं बहु उत्तमतया जनाः आचरन्ति, अग्रे अपि आचरिष्यन्ति ।

**Rishab Sai**
**302F**

## उद्यमेन हि सिध्यन्ति कार्याणि

रमेश: इति कश्चन भिक्षुकः आसीत् । सर्वदा स: मार्गे उपविश्य, "भोजनं ददातु, किञ्चित् धनं ददातु," इति पृच्छति स्म। परन्तु, जना: तस्मै धनं, भोजनं च दातुं न इष्टवन्तः । अत: स: सर्वदा दु:खेन बुभुक्षया उपविशति स्म ।

एकदा कश्चन गुरु: तस्य शिष्यैः सह तत्र अगच्छत् । स: शिष्यान् उद्दिश्य अवदत् "सर्वैः कार्यं करणीयं भवति । उद्यमं विना कार्यं न सिध्यति । अत्र पश्यन्तु, कश्चन भिक्षुकः अस्ति, स: अपि कार्यं करोति चेत्, याचनं विना धनं सम्पादयितुं शक्नोति । परन्तु सः उद्यमं कर्तुं न इच्छति" इति उक्तवान् । भिक्षुक: एतत् श्रुत्वा "अहं किमर्थं भिक्षाटनं करोमि? अहमपि उद्यमं कृत्वा धनं सम्पादयामि । परन्तु तदर्थं किं करणीयं मया?" इति चिन्तितवान् ।

सः एवमेव चिन्तयित्वा मार्गे गच्छन् आसीत् । तत्र सः एकं मूषकं दृष्टवान् । सः मूषकं हस्तेन गृहीतवान् । इतोपि किञ्चित् दूरं गतवान् । तत्र एकं साधुं दृष्टवान्। तस्य समीपे एकः बिडालः आसीत् । बिडालः मूषकं खादितुं इष्टवान् । साधुः उक्तवान् " मम बिडालस्य कृते भवान् मूषकं ददाति वा? अहं भवते धनं दास्यामि" इति । भिक्षुक: तस्मै मूषकं दत्वा धनं स्वीकृतवान् ।

अग्रे मार्गे कश्चन वृद्धं दृष्टवान् । तस्य समीपे काष्ठानां बन्धः आसीत् । वृद्धः उक्तवान् " अहं श्रान्तः अस्मि, मुखं प्रक्षाल्य जलं पीत्वा गच्छामि, कृपया मम काष्ठानां पालनं करोतु इति" । रमेशः तस्य साहाय्यं कृतवान् । वृद्धः तस्मै कानिचन काष्ठानि दत्तवान् । रमेशः काष्ठान् स्वीकृत्य पुनः मार्गे गतवान् । केचन जनाः तं दृष्ट्वा "अस्माकं कृते काष्ठानि ददातु, वयं २० रूप्यकानि दद्मः" इति उक्त्वा काष्ठानि स्वीकृत्य धनं दत्तवन्तः ।

रमेशः बुभुक्षितः आसीत् । उपाहारमन्दिरं गत्वा भोजनं क्रीतवान् । खादनसमये तत्र केचन कृषकाः आगतवन्तः । ते अपि बुभुक्षिताः आसन् । रमेशः तस्य भोजनं तैः सह सम्भक्तवान्। ते कृषका: सन्तुष्टाः भूत्वा रमेशाय शाकानि दत्तवन्तः ।

रमेशः आपणे शाकानि विक्रीतवान् । धनं सम्पादितवान् । एवमेव स: मूषकं विक्रीय, वृद्धस्य साहाय्यं कृत्वा, काष्ठानि विक्रीय, शाकानि विक्रीय च धनम् सम्पादितवान् । अधुना, तस्य समीपे धनम् अधिकम् अस्ति । सः एवं चिन्तितवान् " मम समीपे अधुना धनमस्ति अहम् अनेकानि दिनानि सन्तोषेण यापयितुं शक्नोमि । परन्तु, मद्सदृशाः भिक्षुकाः अनेके सन्ति ये कार्यमपि कर्तुं न शक्नुवन्ति । तेभ्यः अहं मम धनं दास्यामि । यदि आवश्यकं तर्हि पुनः अहं कार्यं कृत्वा धनं सम्पादयामि" इति चिन्तयित्वा अन्येषां भिक्षुकाणां कृते साहाय्यं कृतवान् ।

एवं रमेशः कस्यचन गुरोः वाक्यं मनसि निधाय स्वयम् उद्यमं कृत्वा धनं सम्पादितवान् । अपिच लोभं, गर्वं विना अन्येषां साहाय्यमपि कृतवान् ।

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।**

**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।**

**Ananya Krishnan**
**202C**

**तस्मै गुरवे नमः**

अस्माकं गुरवः न भवन्ति चेत् ज्ञानं न भवति ।
ज्ञानं न भवति चेत् वयं किं कुर्मः?

ज्ञानं विना सर्वं व्यर्थं भवति ।
यदि वयं सर्वे ज्ञानं प्राप्नुमः
तर्हि वयं सर्वे सन्तुष्टाः भविष्यामः ।

यथा दीपस्य प्रकाशः अस्ति तथा गुरोः ज्ञानं अस्ति ।
तेन ज्ञानेन गुरुः अस्माकं सर्वेषां ज्ञानदीपस्य ज्वालनं करोति ।

तस्मै गुरवे नमः ।

When our teachers are not there, then there is no knowledge.
When there is no knowledge then what do we do?

Without knowledge, everything becomes insignificant.
If we all gain knowledge, then we will all become happy.

A teacher's knowledge is like the light of a lamp.
Using that knowledge, the teacher lights all of our lamps of knowledge.

Salutations to that teacher!!

**Sadhvi Swaminathan**
**202E**

# बाल्यकालगीतम्

## चन्द्र चन्द्र धावतु!

चन्द्र चन्द्र धावतु।
हे इन्दो मा तिष्ठतु।
गिरिम् आरुह्य आगच्छतु।
मल्लिकापुष्पम् आनयतु।
हे वर्तुलचन्द्र!
हे वर्णमेघपुष्प!
वाताट इव उड्डयनं करोतु।
भ्रमरक इव भ्रमन् आगच्छतु!

*chandra chandra dhAvatu|*
*he indo mA tiShThatu|*
*girim Aruhya AgachChatu|*
*mallikApuShpam Anayatu|*
*he vartulachandra!*
*he varNameghapuShpa!*
*vAtATa iva*
*uDDayanaM karotu|*
*bhramaraka iva*
*bhramarayatu!*

## Moon, Moon, Run to Me!

Moon, moon, run to me,
Run to me without stopping.
Climb over the mountain and
Bring a jasmine flower for me!
Circle circle moon,
Colorful, cloudlike flower,
Fly like a kite to me,
Spin like a top and come to me.



## நிலா நிலா ஓடி வா!

நிலா நிலா ஓடி வா,
நில்லாமல் ஓடி வா,
மலை மேலே எறி வா,
மல்லிகைப்பூ கொண்டு வா.
வட்ட வட்ட நிலாவே,
வண்ண முகில் பூவே,
பட்டம் போலே பறந்து வா,
பம்பரமாய் சுற்றி வா!

nilaa, nilaa, oDi vaa,
nillaamal oDi vaa.
malai mela Eri vaa,
malligaippU koNDu vaa.
vaTTa vaTTa nilAve
vaNNa mugil pUve
paTTam pOlE parantu vA
bambaramAy sutri vA

**Hiranmayi Narasimhan**
**202C**

**Similarities between Sanskrit and Latin**

There are many similarities between both Sanskrit and Latin. Being a learner of both languages, I notice many similarities occurring in not only the vocabulary but also in the way certain words are spoken and how verb and noun endings change the meaning of the words.

There are so many words that are similar in both languages. For example, the word mother in Latin is *mater*. This is similar to the Sanskrit word *matR*. What is most interesting about both of these words is that they are exceptions to the language. Mater is a feminine word even though a majority of feminine words end in 'a'. This pattern is also seen in Sanskrit.

Even though Latin uses the same script as modern-day English, some letters were not used. These letters are also absent in Sanskrit. For example, Sanskrit doesn't have a 'w' sound in 'walk'. There is no 'w' sound or letter in Latin either. There is no 'z' sound or word in traditional Sanskrit or Latin either.

Finally, unlike English, both Sanskrit and Latin use the endings of the words to convey the part of speech. In Latin, the accusative case is used to denote a direct object. The same in Sanskrit is called *dvitiya vibhakt*i. Additionally, in Sanskrit and Latin, the ending of the verb conveys both its tense and mood instead of requiring the usage of additional words around the verb. For example, 'having been taught' in Sanskrit would translate to "pAThita" and in Latin, it would be "doctus".

Sanskrit and Latin have so much in common. The similarities between both Sanskrit and Latin make learning one language from the other much easier.

**Dhurva Shukla**
**202H**

## My Love for Sanskrit

I started learning Sanskrit when I was in sixth grade, and I will admit that at first, it was only because my parents wanted me to (like most other kids). But since then, I have come to love learning this language as it takes me back to my roots. Since learning Sanskrit helps me make connections to how it provides a basis for all other Indian languages, I feel very fortunate to be in a culture where the ancient languages still exist for me to learn from. I also love how I am now able to make connections between what I learn in class and the prayers and slokas I recite in the mornings and evenings because of the newly found knowledge that I have.

Joining SAFL has been a great experience for me so far because of how much I have learned in just the seven months I've been in the class. I think it's great how the SAFL teachers can teach so much even though the class is virtual. I look forward to what I can continue to learn and gain from this class in the years to come.

**Nithya Rupavatharam**
**102E**

## SAFL Program

SAFL (Samskritam As a Foreign Language) is a great program, teaching us the Sanskrit language and Indian culture. Through this program, I am learning the basics of Sanskrit, such as conversing, reading, and writing fluently. Each class covers a variety of topics and provides you with homework for practicing each skill: listening, reading, writing, and speaking. After covering all the topics in a unit, the teachers conduct a unit test that assesses your understanding of the material. I enjoy this program because it helps you keep in touch with the culture as well. Every lesson covers a small passage on a tradition, event, or cultural activity that occurs in India. The end of the passage has a small sloka which explains the importance of our culture.

Learning Sanskrit also helps to correctly chant Vedas and experience their divine vibrations. There are 4 Vedas: Rigveda, Sāmaveda, Yajurveda, and Atharvaveda, all of which are in Sanskrit. Many western countries are accepting Sanskrit as an important language because more people are acknowledging the importance of our culture and values. Schools are starting to recognize the language and issuing credits.

By enrolling in SAFL, I am receiving a credit for a foreign language other than Spanish. I intend to continue to the next level and thoroughly understand the language.

**Sai Smaran Dasu**
**102E**

## The Benefits of Learning Sanskrit

While Sanskrit is an ancient language whose history is fascinating to study, learning the language itself provides various benefits. These unique benefits include improved memory, a better understanding of history, and an increased familiarity with other Indian languages.

Dr. James Hartzell, a neuroscientist, was inspired to start research on the effect of learning Sanskrit on memory after he witnessed hundreds of young Sanskrit pandits reciting mantras for over six hours in unison with no errors or pauses. He called it "The Sanskrit Effect", finding that the chanting and memorization of the Vedic verses in Sanskrit increases the size of the brain and improves memory power. To test his theory, Dr. Hartzell gathered 42 males. 21 were Sanskrit pandits who had undergone over 10,000 hours of Sanskrit training and the other 21 volunteers were not trained in Sanskrit. They were all given the same tasks, and the Sanskrit pandits performed much better than the volunteers. Subsequent MRI scans showed the increased brain size.

There is an ocean of Sanskrit literature. Much of this work has retained its relevance for millenia. Some famous examples include the 4 Vedas: Rigveda, Samaveda, Yajurveda, and Atharvaveda. Knowing Sanskrit, we can uncover more about our ancient culture and civilization through these repositories of knowledge. Pāṇini, who is considered the father of Sanskrit grammar, formally laid out the rules of Sanskrit grammar in his Ashtadhyayi, which defines the grammar system with algorithmic precision and concision.

There are 22 official languages in India, of which around 14 are derived from Sanskrit. With a knowledge of Sanskrit, the connections to Sanskrit and each other become quite clear, and learning any of these languages becomes considerably easier. Additionally, Latin and its derivative languages such as Spanish, French, and Italian become considerably easier to pick up with an understanding of Sanskrit grammar.

Sanskrit is a language with many benefits that most don't realize. Learning Sanskrit is an opportunity that not many can have, so let's not waste it. Let's make the most of our Sanskrit knowledge.

**Preksha Jayaram**
**102D**

## Dogs In Hindu Dharma

Dogs are common pets in today's society. They not only provide companionship but recent studies show that dogs also reduce stress, lower blood pressure, help to prevent heart disease, and help fight depression. They can also be trained for specific jobs such as tracking, explosive detection, patrolling, search and rescue, and attacking. Their work is invaluable, and it's no wonder that they are precious resources. The value of dogs may seem restricted to the context of the Western world, since dogs are prohibited in many places in India and strays are in surplus. But did you know that historically, dogs have played important roles in our Hindu dharma as well?

The Rig Veda first describes the role of a dog as a protector. When Indra*'s* cows were stolen by the Paṇis, Indra first sent a bird, Suparṇa, to get the cows. But Suparṇa was easily bribed by curd, and went back to tell *Indra* that there were no cows. Indra then kicked Suparṇa in the stomach, which caused Suparṇa to vomit up the curd and be branded a traitor. Then, Saramā the divine dog of the gods went to save the cows. She convinced the Paṇis to return the cows as well as secured a deal with Indra that her future children will always be able to have milk whenever they like. Her two children became messengers of the god of death, Yama. They have four eyes each and are said to guard the path to the afterlife.

In the *Mahābhārata,,* the eldest *Pāṇḍava* Yudhiṣṭhira let go of all his brothers and his wife as he walked up the path to heaven. But he pleaded for the stray dog to accompany him. When the dog was not allowed to enter heaven, Yudhiṣṭhira himself refused to enter if the dog was not allowed. Moreover, in Nepal, they have a version of Diwali called Kukur Tihar when dogs are worshiped, and given treats and garlands. Tihar is a grand celebration, thanking dogs for their loyalty and protection.

In the holy temple of Gangapur in Maharashtra, where Lord Dattātreya resides, dogs are not restricted from entering and living inside the temple. Dattātreya is commonly pictured with four dogs that are symbols of the four Vedas and a cow that symbolizes Mother Earth.

Dogs are special beings, not only from the past, but also today. Their significance in Hindu dharma can never fade away.

**Ritsika Dutta**
**102B**

# कटपयादि-सङ्ख्याः

In ancient Indian mathematical and scientific texts written in Samskritam, certain relevant numerical values were coded into the verses of the texts themselves. This system of coding numerical values into Sanskrit verses is known as the kaTapayAdi numbering system.

Why is the numbering system called kaTapayAdi? The answer lies in the numbering system itself.

Decoding Chart:

| | | | | |
|---|---|---|---|---|
| क | ट | प | य | 1 |
| ख | ठ | फ | र | 2 |
| ग | ड | ब | ल | 3 |
| घ | ढ | भ | व | 4 |
| ङ | ण | म | श | 5 |
| च | त | | ष | 6 |
| छ | थ | | स | 7 |
| ज | द | | ह | 8 |
| झ | ध | | ळ | 9 |
| ञ | न | | | 0 |

Note: any stand-alone vowel denotes the value of zero.

The first row of the decoding chart spells ka-Ta-pa-ya, hence the name kaTapayAdi. As for the decoding itself, for every full consonant or stand-alone vowel, the decoding chart must be used to figure out the relevant numerals. Then, the obtained number must be taken and written right to left.

A famous example is a verse from the Ṣaḍratnamālā written by Shankaravarman. The Ṣaḍratnamālā is a treatise on astronomy and mathematics. In it, there is a set of verses explaining the process of determining the circumference of a circle.

(वृत्तपरिधिः)

वर्गाद् व्यासस्यार्कनिघ्नात् पदं यत्
तत्त्रयंशो यस्ते च तत्तन्नवांशाः ।
द्विघ्नव्येकैकद्विपूर्वौजयुग्म–
च्छिन्नान्यैक्यद्व्यन्तरं वृत्तनाहः ॥१॥

व्यासार्कघ्नकृतेः पदेऽग्निभिरतो नीते च तत्तत्फला–
च्चाथैक्याद्ययुगाहृतेषु परिधिर्भेदो युगौजैक्ययोः ।
एवं चात्र परार्धविस्तृतिमहावृत्तस्य नाहोऽक्षरैः
स्याद् भद्राम्बुधिसिद्धजन्मगणितश्रद्धा स्म यद् भूपगीः ॥२॥

These verses also describe the relationship between the circumference and diameter of a circle. We know the ratio of the circumference of a circle to its diameter is the value of pi. In the verse, through the kaTapayAdi system, the circumference of a circle whose diameter is $10^{17}$ is given.

It is given through the last line of the second verse - "भद्राम्बुधिसिद्ध-जन्म-गणित-श्रद्धा स्म यद् भूपगीः".

If we use the chart shown earlier,

(Only full vowels and full consonants are used to convey numbers)

भ = 4

द्रा = र = 2

म्बु = ब = 3

धि = ध = 9

सि = स = 7

द्ध = ध = 9

If we continue till the end of that line, we will obtain 18 digits of a number. This number will be 423979853562951413.

But, according to the kaTapayAdi system, we must write this number from right to left to obtain the real value we are looking for. This real value is 314159265358979324.

If we perform the calculation given in the verse, which is finding the ratio of the circumference to the diameter, we divide this given number by $10^{17}$.

We get a value of 3.14159265358979324, which is an approximation of pi.

Since the kaTapayAdi numbering system is used in various ancient mathematical and scientific texts, we know the significance of the kaTapayAdi numbers and how to use them in context. Using these kaTapayAdi numbers, we can advance our knowledge of mathematics and science. The fascinating thing about the kaTapayAdi numbering system is that the words in the verse have two meanings. It is amazing that the words themselves make sense in terms of not only their surface-level meaning but also their encoded numerical values.

**Swetha Karthikeyan**
**302F**

Citation:

S. Madhavan. *Sadratnamala of Sankaravarman*. Kuppuswami Sastri Research Institute, 2011.

# चित्रकला




***Sahasra Chinta***
***102C***




***Sruthi Karthik***
***202E***




***Suruchi Dokka***
***102C***




भगवद्गीतायां षोडश-अध्यायस्य नाम दैवासुरसम्पद्विभागयोगः |

तस्मिन् केचन गुणाः - सत्यम्, शीलम्, त्यागः, सेवा, करुणा, क्रोधः, मात्सर्यम्, लोभः, क्रूरता, अहङ्कारः च अत्र विहिताः |

*Vishnu Bharadwaaj*
*SAMS 302H*

# SAFL Newsletter

Thanks to

SAFL teachers

Revathi Subramanian
Tanuja Godara
Mugdha Deshpande

and SAFL alumni

Chandrakumari Suvarna – Class of 2013
Sahana Cidambi – Class of 2013
Vivek Rallabandi - Class of 2018
Vijay Nadgauda - Class of 2018
Anant Ayyar - Class of 2018
Gohitha Venkluri - Class of 2019

for doing the necessary editorial and design work in creating this edition

Samskrita Bharati
2068 Walsh Avenue,
Suite B2,
Santa Clara CA 95050

safl.sbusa.org
safl@sbusa.org
408 752 2182